"कान्त्या गिरा सूनृतया च योग्या
त्वमेव कल्याणि ! तयोस्तृतीया ॥" )
उपायी । शक्तः । इति मेदिनी हेमचन्द्रश्च ॥ ( यथा, मार्कण्डेये । ७१ । १० ।
"अपत्नीको नरो भूप न योग्यो निजकर्म्म-
णाम् ॥"
योजनसाधनभूतः । यथा, ऋग्वेदे । ३ । ६ । ६ ।
"ऋतस्य वा केशिना योग्याभिः ।"
"योग्याभिर्योजनसाधनभूताभी रज्जुभिः ।" इति सायणः ॥ शकटादियोजनीयः । यथा, शतपथब्राह्मणे । १।३।१ । १३ ।
"योक्त्रं वा हि योग्यं युञ्जन्त्यस्ति वै पत्न्या
अमेध्यं यदवाचीनम् ।"
"योग्यं योजनीयमनडुदश्वादिकम् ।" इति तद्भाष्यम् ॥ ) पुष्यनक्षत्रे, पुं । इति मेदिनी । ये, ४६ ॥

योग्यता, स्त्री, ( योग्यस्य भावः । योग्य+तल् । टाप् । ) क्षमता । इति लोकप्रसिद्धिः ॥ (यथा, मार्कण्डेये । ११३ । ६ ।
"तथान्यान्यप्ययोग्यानि योग्यतां यान्ति कालतः ।
योग्यान्ययोग्यतां यान्ति कालवश्या हि
योग्यता ॥")
शाब्दबोधकारणविशेषः । स तु पदार्थानां परस्परसम्बन्धे बाधाभावः । इति साहित्यदर्पणम् ॥ न्यायमते तत्पदार्थे तत्पदार्थवत्ता । यथा,—
"पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता ।"
इति भाषापरिच्छेदः ॥
"योग्यतां निरूपयति पदार्थ इत्यादिना । एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता इत्यर्थः । तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः । नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात् प्राक् सर्व्वत्र न सम्भवति वाक्यार्थस्यापूर्व्वत्वादिति चेन्न तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताया ज्ञानस्य सम्भवात् । नव्यास्तु योग्यताज्ञानं न शाब्दज्ञाने कारणं वह्निना सिञ्चति इत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यताया निश्चयेन प्रतिबन्धान्न शाब्दबोधः । तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानत्वेन प्रतिबन्धकत्वात् शाब्दे प्रतिबन्धकत्वं सिद्धं योग्यताज्ञानविलम्बाच्च शाब्दविलम्बोऽसिद्ध इति वदन्ति ।"
इति सिद्धान्तमुक्तावली ॥

योग्या, स्त्री, ( योग्य+टाप् । ) अभ्यासः । ( यथा, रघुः । ८ । १९ ।
"अपरः प्रणिधानयोग्यया
मरुतः पञ्च शरीरगोचरान् ।"
"अपरो रघुः प्रणिधानयोग्यया समाध्यभ्यासेन ।" इति मल्लिनाथः ॥ ) अर्कयोषित् । इति मेदिनी । ये, ३६ ॥ शस्त्राभ्यासः । तत्पर्य्यायः । खुरली २ श्रमः ३ अभ्यासः ४ । तङ्कः खलूरिका । इति हेमचन्द्रः । ३ । ४५२ ॥
( यथा, सुश्रुते सूत्रस्थाने ९ अध्याये ।
"अथातो योग्यासूत्रीयमध्यायं व्याख्यास्यामः । अधिगतसर्व्वशास्त्रार्थमपि शिष्यं योग्यां कारयेत् । छेद्यादिषु स्नेहादिषु च कर्म्मपथमुपदिशेत् । सुबहुश्रुतोऽप्यकृतयोग्यः कर्म्मस्वयोग्यो भवति । तत्र पुष्पफलालाबूकालिन्दकत्रपुसैर्व्वारुककर्कारुकप्रभृतिषु छेद्यविशेषान् दर्शयेदुत्कर्त्तनपरिकर्त्तनानि चोपदिशेत् । दृतिबस्तिप्रसेवकप्रभृतिषूदकपङ्कपूर्णेषु भेद्ययोग्याम् । सरोम्णि चर्म्मण्याततेलेख्यस्य । मृतपशुसिरासूत्पलनालेषु च वेध्यस्य । घुणोपहतकाष्ठवेणुनलनालीशुष्कालाबुमुखेष्वेष्यस्य । पनसबिम्बीबिल्वफलमज्जमृतपशुदन्तेष्वाहार्य्यस्य । मधूच्छिष्टोपलिप्ते शाल्मलीफलके विस्राव्यस्य । सूक्ष्मघनवस्त्रान्तयोर्मृदुचर्म्मान्तयोश्च सीव्यस्य । पुस्तमयपुरुषाङ्गप्रत्यङ्गविशेषेषु बन्धयोग्याम् । मृदुमांसपेशीषूत्पलनालेषु च कर्णसन्धिबन्धयोग्याम् । मृदुषु मांसखण्डेष्वग्निक्षारयोग्याम् । उदकपूर्णघटपार्श्वस्रोतस्यलाबूमुखादिषु च नेत्रप्रणिधानबस्तिव्रणबस्तिपीड़नयोग्यामिति । भवतश्चात्र ।
एवमादिषु मेधावी योग्यार्हेषु यथाविधि ।
द्रव्येषु योग्यां कुर्व्वाणो न प्रमुह्यति कर्म्मसु ॥
तस्मात् कौशलमन्विच्छन् शस्त्रक्षाराग्निकर्म्मसु ।
यस्य यत्रेह साधर्म्म्यं तत्र योग्यां समा-
चरेत् ॥"
( युवती । यथा,—
"निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥"
योग्या युवती । इति राजवल्लभः ॥ )

योजनं, क्ली, ( युज्यते मनो यस्मिन्निति । युज् + ल्युट् ।) परमात्मा । चतुःक्रोशी । योगः । इति मेदिनी । ने, ११३ ॥ * ॥ ( यथा, हरिवंशे । १४६ । १३ ।
"गान्धारकन्या वहने नृपाणां
रथे तथा योजनमर्च्चितानाम् ॥" )
चतुःक्रोशार्थे यथा,—
"द्वादशाङ्गुलिकः शङ्कुस्तद्द्वयन्तु शयः स्मृतः । तच्चतुष्कं धनुः प्रोक्तं क्रोशो धनुःसहस्रकः ॥ तच्चतुष्कं योजनं स्यादित्यादि मानशास्त्रम् ॥ एतन्मते षोड़शसहस्रहस्तैर्योजनं भवति । द्वात्रिंशत्सहस्रहस्तैरपि योजनम् । यथा,—
यवोदरैरङ्गुलमष्टसंख्यै-
र्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः
क्रोशः सहस्रद्वितयेन तेषाम् ।
स्याद्योजनं क्रोशचतुष्टयेन
तथा कराणां दशकेन वंशः ॥"
इति लीलावती ॥

योजनगन्धा, स्त्री, ( योजनं गन्धोऽस्याः । योजनात् गन्धोऽस्या इति वा । ) कस्तूरी । सीता । सत्यवती । इति मेदिनी । धे, ४८ ॥ ( यथा देवीभागवते । २ । २ । १८ ।
"इत्युक्तेन तु सा कन्या क्षणमात्रेण भाविनी ।
कृता योजनगन्धा तु सुरूपा च वरानना ॥")

योजनगन्धिका, स्त्री, सत्यवती । इति जटाधरः ॥ कस्तूरी । इत्यजयपालः ॥ सीता । योजनगन्धाशब्दात् स्वार्थे कप्रत्ययेन जातत्वात् ॥

योजनपर्णी, स्त्री, (योजनाय सन्धिस्थानादेर्म्मेलनार्थं पर्णं यस्याः । ) मञ्जिष्ठा । इति रत्नमाला ॥

योजनवल्लिका, स्त्री ( योजनवल्ली + स्वार्थे कन् । टाप् । ) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

योजना, स्त्री, योगकारणम् । इति ण्यन्तयुजधातोरनप्रत्ययेन सिद्धम् ॥

योजनवल्ली, स्त्री, ( योजनगामिनी अतिदीर्घा वल्ली यस्याः सा । ) मञ्जिष्ठा । इत्यमरः । २ । ४ । ९१ ॥ ( तथास्याः पर्य्यायः ।
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

योजितं, त्रि, कारितयोजनम् । ण्यन्तयुजधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥ ( यथा, भागवते । ४ । २१ । २२ ।
"अहं दण्डधरो राजा प्रजानामिह
योजितः ॥" )

योटकः, पुं, योटनम् । मेलनमिति यावत् । विवाहे राशियोटक-ग्रहयोटक-नक्षत्रयोटक-गणयोटक-वर्णयोटक-योनियोटक-वर्गयोटकभेदेन सप्तविधो योटकः । तत्र राशियोटके षड़ष्टकनवपञ्चमद्विद्वादशविषमसप्तकयोगा निषिद्धाः । तदाह श्रीपतिसंहितायाम् ।
"षड़ष्टकं त्रिकोणञ्च द्विद्वादशकमेव च ।
परस्परं जन्मराशेस्त्यक्ता कन्याकुमारयोः ॥
षड़ष्टके भवेद्दोषो वैधव्यं मृत्युरेव वा ।
त्रिकोणे पुत्त्रहानिः स्यात् धनहानिर्धनव्यये ॥
पुरुषस्याष्टमे कन्या कन्यायाः षष्ठके पुमान् ।
शुभं षड़ष्टकं ज्ञेयं नोद्वाहे दूषणं भवेत् ॥
नवपञ्चमे ।
पुंसो ग्रहात् सुतगृहे सुतहा च कन्या
धर्म्मे स्थिता सुतवती पतिवल्लभा च ।
द्विद्वादशे धनगृहे धनहा च कन्या
रिष्फे स्थिता धनवती पतिवल्लभा च ॥
योटके सप्तके मेषतुलौ युग्मद्वयौ तथा ।
सिंहघटौ सदा वर्ज्यौ स्मृतिस्त्वाब्रवीच्छिवः ॥
राजयोटकमाह दीपिकायाम् ।
एकराशौ च दम्पत्योः शुभं स्यात् समसप्तके ।
चतुर्थदशके चैव तृतीयैकादशे तथा ॥"
इति राशियोटकविचारः ॥ * ॥
ग्रहयोटके ग्रहशत्रुयोगो निषिद्धः । कन्यावरराश्यधिपग्रहयोः शत्रुत्वे ग्रहशत्रुयोगः । तत्र विवाहे रोगादिः फलम् । तदाह गर्गः । मरणं